संस्कृत. -रु.गं. १।

स्मार्त.

# यति संस्कार

याज्ञिक

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

यतीसंस्कारः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2) श्रीगणेशायनमः॥अथयतीसंस्कारः।सिध्यनंतरंपुत्रादिःशिष्योवास्नात्वाधिकार
सिध्यर्थंवपनकृछ्रात्वरणेकुर्यात्।तत्रसंकल्पः।करिष्यमाणयतिसंस्कारोरधिकार
सिध्यर्थंकृछ्रत्रयात्मकंप्रायश्चित्तंप्रतिकृछ्रमेकगोनिष्क्रयद्वाराअहमाचरिष्ये
इतिसंकल्प्यपूर्वकंकृत्वावपनंकुर्यात्॥अत्रातिरिक्तस्यवपनंनेतिकेचित्।देशा
कालौसंकीर्त्यब्रह्मीभूतनारायणरूपिणामुकभिक्षुःशौनकोक्तेनविधिनासंस्कारयि
ष्येइतिसंकल्प्यअव्रणनवकलशमादायतीर्थोदकेनापूर्यतदुदकंगंगेचयमुने०
कुरु।नारायणंमहाज्ञे०नारायणात्स्थितः॥देवदत्ततयाकाश्चिद्ब्रह्मैवविकृतिंग
तः।पूर्णब्रह्मैवसंप्राप्तस्तस्यब्रह्मतदुच्यते॥इत्येतैर्मंत्रैःकलशमभिमंत्र्यप्राणा
यामपुरस्सरः॥शोद्धमंत्रैर्विष्णुसूक्तेरापोहिष्ठेतितिसृभिर्यतेस्नापयित्वापश्चा
त्तच्छरीरंवस्त्रचंदनाद्युपचारैरभ्यर्च्यशिक्येशरीरमारोप्यगंधपुष्पैरलंकृ

Rajwade Sanshodhan Mandal, Dhule and the ... Pratishthan, Mumbai

(2A)

स्वमंत्रघोषैर्जयशब्दादिभिर्दुंदुभिरवैरपिग्रामात्प्राचीमुदीचींवादिशंनीत्वाशु
द्धदेशंसमाश्रयेत्।नदीतीरेश्वत्थमूलेदेवतायतनेवाधस्तात्तद्वृक्षस्यग
र्तंकुर्यात्॥यथाविधिततोभूमिंव्याहृतिभिःसंप्रोक्ष्यदंडप्रमाणमधोगर्तंचतुर
स्रंदेवयजननाम्नींखनित्वातन्मध्येसूक्ष्मगर्तंसार्धहस्तपरिमितंगत्वासप्तव्या
हृतिभिःपंचगव्येनप्रोक्ष्यजलसमाधिपक्षेगर्तस्थानेमहानदींवापरिकल्प्य
तत्रपंचगव्यंप्रक्षिप्यदक्षिणाग्रान्कुशानास्तीर्यसावित्र्याशरीरंप्रोक्ष्यपुरुषसू
क्तेनशरीरंखोदकेनस्नाप्यप्रणवेनअष्टोत्तरशतवारंसंस्नाप्यशेषोडशोपचारैरे
भ्यर्च्यतुलस्यादिमीलितपुष्पमालाशोभितंलकस्यविष्णोर्हव्यैरक्षस्वेतिशरीर २
गर्तेनयावानिधाय।ॐइदंविष्णुर्विचक्रमेस्वाहेतिदक्षिणहस्तेदंडंत्रेधाकृत्वा
निधाय।ॐहंसःशुचिषद्०बृहत्।परेणनाकं०परिमुच्यंतिसर्वे।इतिहृदये

यतीसंस्का

(3)

जपेत्।पुरुषसूक्तंभ्रुवोर्मध्येजपेत्।ॐब्रह्मजज्ञानंप्र०विवः।इतिमूर्ध्नेजपेत्।वि
ष्णोरराटम०विश्वेत्वा।इतिनाभौजपेत्।देवस्यत्वेतिकद्योः।ॐभूमिर्भूमिम
गान्माताभातरमप्यगात्।भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसाभिद्यतामितिमंत्रेण।
२ मूर्धानमश्मनापरशुनाशंखेननारिकेरेनवाभिंद्यात्।शिरोभेदनकर्तुमशक्तश्चे
च्छिरसिगुडपिंडमन्यद्वाफलंनारिकेरादिनिधायभिंद्यादित्याचारः।दर्भैःप्रच्छा
द्यश्रवणेनदेवयजनंलवणसिकतादिनापूरयेत्।नद्यादौनोच्छिरोभेदेनानंत
रंभूरित्यादिनाभिमंत्र्यदर्भैःप्रच्छाद्यभूर्भुवःस्वरो[illegible]मित्याभिमंत्र्यपाषाणैर्दृढंब
ध्वाजलेमहाहृदेश्रवणेनस्वाहातेनाभिक्षुदेहंमोचयेत्।पुत्रश्चरेत्।श्रकेतुनाव २
हत्ता०ववर्धो३म्।इदंतएकं०सधस्थे३म्।नाकेसुपर्णं०भुरण्यो३म्।आति
द्रवसा०मरंस्यो३म् योतेश्वानौयम०मीवचधेह्यो३म्।उरुणसावसु०द्ये

(३१)

हभद्रो३म् सोमएकेभ्यः प० गच्छतात्। येयुध्यंतेप्र० गच्छतात्। पयसाये
अनाधृष्या० गच्छतात्। अश्मन्वतीस२० जानुत्तरेम। येद्देदेवस्यसवितुः
प० अग्नेस्तेजसासूर्यस्यवर्चसा॥ इत्यनुवाकं। अग्निना ग्निः समिध्यते० स
ख्यासमिध्यसे। तंमर्जयंतसुक्रतुं० मंतिदेवाः। इतिचतस्त्रोऋचः। चित्तिः स्रु
क्।१।१ पृथिवीहोता॥२॥ अग्निर्होता॥३॥ सूर्यंतेचक्षुः॥४॥ महाहविर्होता॥५॥ इति
पंचानुवाकान्। अत्तोदेवाअवंतुनइतिषड्ऋचोजपित्वाजन्मादिसंभावितपापे
सहस्र मुक्तोवयंअश्वमेधफलंप्राप्तोइतिभावयंतोनमस्कृत्यअवभृथबुध्यात्तागं
धादिधृत्वानैवेद्यशेषंगृहीत्वाआगमनोत्सवादधिकोत्सवोगच्छेयुः। उच्चैर्ह
रिस्मरणपूर्वकंपुनश्चेहसकेतुनेसनुवाकंगर्तस्यहृदस्यवापश्चादुपविश्यहो
तन्वदेवस्त्वर्यंयात्रांसेत्। अग्निनाग्निरित्यादीनिवांसेदितिविशेषः। ततः कर्तास्ना

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

त्वाचम्यसिद्धिंगतस्यब्रह्मीभूतस्यनारायणरूपिण:तृप्त्यर्थंतर्पणंकरिष्येइतिसं
(५) कल्प्यसव्येनदेवतीर्थेनैवआत्मानंतर्पयामिइतिविशेष:।अंतरात्मानं०परमात्मा
३ नं०इत्यादयश्चतुर्वारंतर्पणंकुर्यात्।तत:शुक्लपक्षेमृतस्यकेशवादिद्वादशना
मभि:कृष्णपक्षेमृतस्यसंकर्षणादिद्वादशनामभि:।एवंतर्पणंकुर्यात्।तच्चकेशा
वंतर्पयामीत्येवंप्रकारेणाक्षीरेणोनिकेचित्।तीरप्राप्तंधौतवस्त्रंपरिधाय।आ
चम्यसिद्धिंगतस्यब्रह्मीभूतस्यपरमहंसनारायणरूपिण:तृप्त्यर्थंनाराय
णपूजनंकरिष्येइतिसंकल्प्यदेवयजनोपादिनदीतीरेवाचतुरस्त्रवेदिकासंपा
द्य तत्रमृन्मयंलिंगंसंस्थाप्यालंकृत्यअत्रास्मोनदीजलेएतत्स्वरूपंवाविचिंत्य पु
रुषसूक्तऋगंतेननमोनारायणायेतिमंत्रमुक्त्वातन्मंत्रसहितषोडशऋग्भिरावा ३
हनादिषोडशोपचारपूजांकुर्यात्।घृतमिश्रपायसबलिंनैवेद्य:घृतदीप:तंनिवे

... Mandal, Dhule and the Yashwantrao Chavan Pratishthan ...

(4A)

दितपायसंनद्याद्विजलेक्षिपेत्।ततः शंखेशुद्धजलमादायतत्रगंधपुष्पतुलसीद
लफलादिजलंचप्रक्षिप्य॥ॐब्राह्मणेनमः इदमर्घ्यंसमर्पयामीत्येवमष्टार्घ्याणि
दत्वागृहंगच्छेत् इतिप्रथमदिनेकृत्यं॥एवंदशादिनपर्यंतंक्षीरतर्पणपूजनपाय
बलिदानदीपदानार्घ्यदानानिप्रत्यहंकुर्यात्॥ततः एकादशेन्हिपार्वणं॥तत्रप्र
योगः॥एकादशाहेपुत्रः प्रातः स्नातः कृतनित्यक्रियोमध्यान्हेविप्रानाहूयन
द्यादौतिलतर्पणंकुर्यात्॥ ॥देशकालौसंकीर्त्यप्राचीनावीतिकाश्यपगोत्र
ब्रह्मीभूतकेशवशर्मणोममपितुः का[illegible]मरणदर्शादिश्राद्धाधिकारार्थंअ सर्व
द्यपार्वणश्राद्धंकरिष्ये इतिसंकल्प्य।यज्ञोपवीतिपुरूरवार्द्रवसंज्ञिकविश्वेदे
वार्थेद्वावेकंवानिमंत्र्य।प्राचीनावीतिअस्मत्पितुःकाश्यपगोत्रस्यब्रह्मीभूतके
शवशर्मणः वसुरूपस्यस्थानेक्षणः क्रियतां।एवंपितामहस्यप्रपितामहस्य

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(5)

स्थानेइत्यादिएकविप्रपक्षेब्रह्मीभूतपितृपितामहप्रपितामहानांइत्यादिदर्वी
श्राद्धवत्पित्रादीनुद्दिश्यपार्वणविधिनैवश्राद्धंसमाप्य।यथाधिकारंवैश्वदेवा
४ दिकृत्वासुहृद्युक्तोभुंजीतेति।पुत्रादन्यः शिष्यादिःकर्ताचेत्।नद्यादौयज्ञोप
वीत्येवआत्मानंतर्पयामीति।एवंअंतरात्मानं०परमात्मानं०देवतीर्थेनैकैक
मंजलींदत्वागृहमेत्यप्राणानायम्यदेशकालौस्मृत्वा।ब्रह्मीभूतस्यगुरोःप्र
त्यद्धादिश्राद्धाधिकारसिध्यर्थंअद्यपार्वणश्राद्धंकरिष्ये।इतिसंकल्प्य।सा
धुरूरूसंज्ञिकविश्वेदेवार्थेक्षणः क्रियतामितिक्षणंदत्वा।एवंआत्मन०अंत
रात्मन०परमात्मनस्थाने०एकविप्रपक्षेत्रयाणामेकत्रक्षणः।ततोब्राह्मणा ४
न्कृतपच्छौचान्आचांतान्प्राङ्मुखानुदङ्मुखांश्चोपविश्य।साधुरूरूसंज्ञका
नांविश्वेषांदेवानांमिदमासनमित्यादिविश्वेदेवार्चनंविधाययज्ञोपवीत्येवआ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)



त्मनः इदमासनंस्वाहानममेतियवसहितकुजुद्वयरूपमासनंदक्षिणतोद
त्वा एवमग्रेपिततः प्रागग्रदर्भेषुपात्रत्रयंप्राक्संस्थमासाद्य प्रतिपात्रेदर्भद्व
यान्वितेजलमासिच्य शंनोदेवीतिसकृदनुमंत्र्य।यवोसिसोमदेवत्यो० नःस्वाहान
मः।इतिमंत्रेणप्रतिपात्रंयवानोप्य।तूष्णींगंधपुष्पाणिचनिक्षिप्यस्वाहार्घ्याइ
तिनिवेद्य।आत्मनिइदमर्घ्यंस्वाहानमम।अंतरात्मनिइदमर्घ्यं०परमात्मनिइदम
र्घ्यं०इत्यर्घ्यंदत्वा।आत्मन्एषगंधः।अंतरात्मन्०परमात्मन्०धः।एवमाछादनां
तमभ्यर्च्य।भोजनपात्राण्यासाद्योपस्तीर्यभोजनार्थादन्नादुद्धृत्यघृतान्तंकृत्वा।
आत्मनेस्वाहा।अंतरात्मने०परमात्मने० इतिप्रत्येकंअग्नौपाणिषुवाहुत्वा।अग्नौ
करणंनास्तीतिकेचित्।ततोन्नादिपरिविष्य।गायत्र्याप्रोक्ष्यपृथिवीति०इदंवि
ष्णु०साधुकृतसाक्षिकेभ्यो०इदमन्नंयथाशक्तिसोपस्करंस्वाहानममएवंसर्वत्रा

यत्तीसंस्कार

६

नस्यागंकृत्वा।ब्रह्मार्पणं० एकोविष्णु० अनेनब्राह्मणभोजनेननारायणःप्रीयत्तांम्।
ओंतत्सत्।।अपांमेध्यंयज्ञियं० शारदःशातं। इतिबर्हिराहृत्य अपहतेतिप्राग
५ ग्रेरेखांकृत्वेस्मादिमार्जयंतां आत्मनः मार्जयंत्तां।अंतरात्मनःमार्जयंतां।परमा
त्मनः इतिदर्भमूलमध्याग्रेषुत्रिषुरेखासुजलंनिनीय आत्मन् अयंतेपिंडस्वा
हानमम।अंतरात्मन्० परमात्मन्० इतिपिंडत्रयंदत्त्वा। तूष्णीमनुमंत्रणादि
पिंडप्रवाहणांतंसमाप्यभुक्तवद्भ्योब्राह्मणेभ्यः तांबूलदक्षिणांदत्त्वानमस्कृ
त्याविसृज्यवैश्वदेवादिकृत्वासुहृद्युक्तोभुंजीत। इतिशिष्यंप्रतिपार्वणप्रयोगः।।
ततोद्वादशेहनिनारायणबलिंकुर्यात्।तत्रप्रयोगः।। एकादशेद्वादशेवेति
विहितकालेशुद्धस्नात्वादेशकालौसंकीर्त्यब्रह्मीभूतस्यगुरोःसिद्धिदिनमा ५
रभ्यद्वादशेहनिकेशवादिद्वादशरूपिणेगुरोःसंभावितसर्वपापक्षयपूर्वकंवि

(6A)

ष्णुलोकप्राप्तिद्वाराश्रीनारयणप्रीत्यर्थंनारायणबलिंकरिष्येइतिसंकल्प्य।कृष्णप
क्षेस्मृतस्यतुसंकर्षणादीत्युक्तेरवः ततस्त्रयोदशावरान्यतीन् असंभवेत्रयोदशवि
प्रान्वासपात्तिकत्वसाधुत्वादिगुणयुक्तांनिमंत्रयेत्।ततः शुक्लेकेशवरूपीगुर्वर्थेभ
वद्भिःक्षणः कर्तव्यः।एवंनारायणरूपीगुर्वर्थे२माधवरू०३गोविंदरू०४विष्णुरू०५
मधुसूदनरू०६त्रिविक्रमरू०७वामनरू०८श्रीधररू०९हृषीकेशरू०१० पद्मनाभरू०११
दामोदररू०१२।कृष्णपक्षेसंकर्षणरू०१वासुदेवरू०२प्रद्युम्नरू०३अनिरुद्धरू०४
पुरुषोत्तमरू०५अधोक्षजरू०६नारसिंहरू०७अच्युतरू०८जनार्दनरू०९उपेंद्ररू०१०
हरिरू०११श्रीकृष्णरू०१२।इतिद्वादशविप्रानिमंत्र्यत्रयोदशविप्राग्रआत्मसंस्थ
जितेंद्रियत्वगुणयुक्तंविष्णवर्थेभवद्भिःक्षणकर्तव्यः।इतिनिमंत्र्य पादान्प्रक्षाल्य
प्राङ्मुखानुपवेशयेत्।ततोब्राह्मणाग्रेहोमस्थानंप्रकल्प्यतत्रस्थंडिलेयत्रकृत्वाग्नि

(७) मितिविधिनाग्निंप्रतिष्ठाप्यपायसमष्टाग्निंद्वादाकृतीपर्याप्तविष्णुर्नैवेद्यार्थंचरुंश्र
पयित्वाभिघार्यप्राचीमुदीचींवोद्वास्यप्रतिष्ठितमभिघार्यअग्निमिध्मेत्यादिआग्नि
५ मुखांतंकुर्यात्।कर्त्ताआश्वलायनश्चेत्क्रियमाणहोमेस्त्वाडित्यादिकरिष्यइत्याद्य
ग्निध्यानांतेन्वाद्ध्यात्।समिद्द्वयमादायक्रियमाणेनारायणबलिहोमेदेवतापरि
ग्रहार्थमन्वाधानंकरिष्ये।।अस्मिन्नन्वाहितेग्नावेसादिचक्षुषीआज्येनेत्यंतमु
क्त्वा।अग्निंवायुंसूर्यंप्रजापतिंचमरुत्समस्तव्याहृतिभिरेकैकपायसाहुत्या।विष्णुं
अतोदेवेतिषड्भिःप्रत्यृचमेकैकपायसाहुत्यानारायणंपुरुषसूक्तेनप्रत्यृचमेकै
कपायसाहुत्याकेशवादिद्वादशदेवताःएकैकपायसाहुत्याशेषेणेत्यादिपूर्णपा ६
शत त्रंनिधायांतेद्विपंचाशदधिकैंमुष्टीन्तूष्णींनिरूप्यावघातादिकृत्वापायसंश्रप
यित्वेत्याद्याज्यभागांतंकुर्यात्।इतिविशेषः।ततोग्रेणाग्निंशालस्यामंविष्णुंपुरुष
सूक्तेनप्रत्यृचंनमोनारायणायेत्यंतेनषोडशोपचारैरभ्यर्च्यअग्निसमीपाग्नेत्यव

कूलेसंकर्षणादिद्वादशदेवताः ४

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

दानसंपदास्स्रुचाहस्तेनवा होमंकुर्यात्।तत्रक्रमः॥ॐभूःस्वाहा।अग्नयइदं॰
भुवःस्वाहा।वायवइदं॰स्वःस्वाहा।सूर्यायेदं।ॐभूर्भुवःस्वःस्वाहा।प्रजापतय॰
ॐअतोदेवाअवंतुनो॰विष्णवइदं॰एवंषट्स्वपित्यागः।ओंइदंविष्णुर्विच॰ॐ
त्रीणिपदा॰ॐविष्णोःकर्माणि॰ॐतद्विष्णोःपर॰ॐतद्विप्रासो॰ॐसहस्र
शीर्षा॰नारायणायेदंनममेतिषोडशाहुतीत्यागः।ॐपुरुषएवेदं॰ॐएतावा॰
एवंपुरुषसूक्तस्यषोडशाहुतयः१६ॐकेशवायनमस्वाहेतिद्वादशाहुतयः१२
तासांयथालिंगंत्यागाः।ॐसंकर्षणायनमस्वाहेतिद्वादशाहुतयः१२
तासांयथालिंगंत्यागाः।ततःस्विष्टकृतादिहोमशेषंसमाप्य।पुनर्विष्णुंसंपू
ज्य।नारायणायविद्महे॰यात्।विष्णवेनमःइदमर्घ्यंसमर्पयामीत्यर्घ्यंदत्वाहुत
शेषेणपायसेनपूर्वोक्तमंत्रेणविष्णवेनमबलिंसमर्पयामीतिबलिंदद्यात्।प
ततोनिमंत्रितान्ब्राह्मणान्पूजयेत्।यथाकेशवरूपियेगुरवेनमःइदमासनं।

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(४)

नारा० माध० गोविं० विष्णु० मधु० त्रिवि० वाम० श्रीध० हृषी० पद्म० दामो० कृष्ण। संकर्ष०
वासु० प्रद्यु० अनि० पुरु० अधो० नार० अच्यु० जना० उपें० हर० श्रीकृ० एवंगंधपुष्पधूप
दीपआच्छादनानिदत्वा। त्रयोदशब्राह्मणपुरुषसूक्तेनप्रत्यृचंतत्तेविष्णवेनमः विष्णु
८ आवाहयामि। इत्येवंपंचोपचारैर्वा अभ्यर्च्यचतुरस्रमंडलोपरिभोजनपात्राण्यासा
द्योपस्तीर्यविशिष्टपायसादिद्रव्यपात्रेषुपरिविष्यगायत्र्यातत्तत्पात्रस्थमन्नंप्रोक्ष्य
पृथिवीतेपात्रंइदंविष्णुरितिमंत्राभ्यामुपस्पर्शयित्वातत्तद्रूपीगुरूपदेशेनचतत्तत्पा
त्रस्थमन्नंत्यक्त्वा। अतोदेवाअवंतुनइतिषड्चामुपस्थाप्यओंतद्ब्रह्मेति० भूर्भुवःसुव
रोम् ३। ततोब्रह्मार्पणंब्रह्महवि० एकोविष्णु० र्व्ययइतिपठित्वा। अनेननारायणबलि
ब्राह्मणभोजनेननारायणःप्रीयतां। अपोशनादिप्राणाहुतिकालेचंद्रमामनसोजात
चमुक्त्वा। प्राणायस्वाहेत्यादिप्राणाहुतिंग्राहयित्वाअपोशनंतयाचितव्यमितिसंप्रार्थ्य ८
अथहवैनारायणोकामयेत्यादिकानुपनिषद्भागान्श्रावयेत्इत्यादिभुंक्तेपुनः ॐतद्ब्र

Mandal, Dhule and the

(8A)

१३ ११

त्सं०।सुवरोम् तत्सास्त्विति प्रत्युक्तः तदनंतरं अपोशानं दद्यात्।आचांतेषु उपविष्टेषु
विप्रवर्यद्विजोच्छिष्टसंनिधौ प्राङ्मुख उपविश्य तत्र प्रागग्रान्दर्भानास्तीर्य तेषु ॐ न
मो नारायणायेत्यष्टाक्षरेण साक्षतोदकं दत्वा।केशवादिस्वरूपिणे गुरवे अयं पिंडः स्वाहा
न मम इत्येवं रीत्या द्वादशनामभिः द्वादश पिंडान्पायसेन दद्यात्। कृष्णसंकर्षणाद्यु
क्तेरवः।यद्वा भूः स्वधा।भुवः स्वधा।स्वः स्वधा।भुवः स्वधेति बौधायनोक्तैस्त्रिभिर्मंत्रैः
केशवादिद्वादशरूपिणे अयं पिंडः स्वाहा न मम इत्येवं मंत्रैस्त्रीन्पिंडान्पायसेन दद्यात्।
ततो द्वादशब्राह्मणेभ्यः नारायणबलिसांगतायै तांबूलदक्षिणां दातुमहमुत्सृजे इ
ति संकल्पपूर्वकं दत्वा।विप्रार्थत्रयोदशावि प्रार्थनाभ्यां आसीदिति फलं।सत्सास्या
संनिति तांबूलं यज्ञेन यज्ञमिति दक्षिणां दत्वा।सर्वान्प्रदक्षिणीकृत्य साष्टांगं प्रण
म्य यथाशक्त्यानुव्रज्य हर्षपुरःसरं तान्प्रेषयेत्।पूजितां विष्णुमूर्तिं आचार्याय द
द्यात्।इत्याचार इति केचित्।ततः कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुंजीत।एतावद्वि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

यतीसंस्कार

स्तत्प्रयोगस्तत्शौनकोक्तोबोधायनोक्तव्याहृतिहोमबलित्रयमात्रसहितोवा
(१) प्रयोगःकार्यः।एतैर्मंत्रैःसमिदाज्ययोरपिप्रत्येकंहोमइतिकेचित्॥तत्रमूलंचिं
त्यं॥इतिबोधायनशौनकेयमनुस्मृत्यनुसार्याचानुगृहीत्तोनारायणबलिप्र
योगः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

इतियतीसंस्कारपुस्तकंवेराजक्षेत्रवासीगोरवलेइत्युपनामसदाशिवेनलिखि
तंशाके१७५७मन्मथनामसंवत्सरभाद्रपदमासे

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com